श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ आकाशनगरीशसुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to **Sri. L. Ramarajan** of California for providing the printed text and **Dr. Desikan Parthasarathy** of Bangalore for proof-reading this document.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आकाशनगरीशसुप्रभातम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

उद्यत्कोटिदिवाकरेन्दुसुभगं पीताम्बरालङ्कृतम्
नानाभूषणभूषितं नवघनश्यामं प्रसन्नाननम्।
लावण्याम्बुनिधिं निरस्तलवणं श्रीशङ्खचक्राञ्चितम्
श्रीवैकुण्ठपुराधिपं शुभतनुं भूम्याः पतिं संश्रये॥ १ ॥

मार्कण्डेयमहातपः फलतया श्रीव्योमपुर्यां पुरा
सञ्जाता परिणीय तत्पुरपतिं त्यक्त्वा रसं सैन्धवम्।
भक्तानामभयप्रदाननिरता फुल्लारविन्देक्षणा
सेयं पुष्यतु मङ्गळान्यनुदिनं सर्वाणि सर्वंसहा॥ २ ॥

कौसल्यासुप्रजा राम! पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल! कर्तव्यं दैवमाह्निकम्॥ ३ ॥

उत्तिष्ठोत्तिष्ठ सर्वेश! उत्तिष्ठ धरणीपते।
उत्तिष्ठाभ्रपुराधीश! लोकानां मङ्गळं कुरु॥ ४ ॥

तव सुप्रभातममलायतेक्षणे!
भगवन्मृकण्डुसुतपुत्रि! शोभने।
करुणामयैस्तव कटाक्षतल्लजैः
अभिरक्ष नो धरणिदेवि! तावकान्॥ ५ ॥

मातर्महीश्वरि! मृकण्डुकुलावतीर्णे!
स्वायत्तकान्तविभवे! सरसीरुहाक्षि।
त्वं जागृहि श्रुतिसुखस्तुतिगीतवाद्यैः
श्रीश्रीनिवासदयिते तव सुप्रभातम्॥ ६ ॥

www.prapatti.com

प्राच्यामुदेति दिशि दीपशिखेव भानुः
विप्राः स्वकर्मनिरताः प्रणमन्ति सन्ध्याम्।
उत्तिष्ठ भूस्तनतटद्वयमध्यसुप्त!
वैकुण्ठपुर्यधिपते! तव सुप्रभातम्॥ ७॥

भृङ्गाञ्चितानि मधुमन्ति विकस्वराणि
पुष्पाणि पूजयितुमर्च्यमुपाहरन्तः।
द्वारान्तिके विधिमुखाः प्रतिपालयन्ति
श्रीव्योमपत्तनपते! तव सुप्रभातम्॥ ८॥

गेयं भवन्तमुपवीणयितुं प्रवृत्तान्
कासारभूकलिविरोधिमहच्छठारीन्।
द्वारि स्थितानानुगृहाण शुभैः कटाक्षैः
आकाशपत्तनपते! तव सुप्रभातम्॥ ९॥

वैकुण्ठनाथ इति सूरिनुतोऽसि शुद्धं
आनन्दमालयविमानमुदैरयंस्ते।
निद्राऽपि ते निखिलरक्षणचिन्तनैव
दासान् विलोकय विभो! तव सुप्रभातम्॥ १०॥

क्षेत्रे मृकण्डुसुतदिव्यतपस्समृद्ध्यै
त्वं सन्निधाय तुळसीविपिनेऽवतीर्णाम्।
भूमिं प्रियामनघ यां परिरभ्य शेषे
बुध्यस्व भोः सह तया तव सुप्रभातम्॥ ११॥

भूदारतामुपगतो जलधेर्धरित्रीं
प्रागुद्दधार हि भवान् किमु तच्छ्रमेण।
भूदार एव शयितोऽत्र भुवः कुचाद्रौ
शान्तश्रमो नु भगवन् तव सुप्रभातम्॥ १२॥

पुण्यं तवावतरणात् श्रवणं वनं च
त्याज्यं बभूव लवणं परिणेतुमुर्वीम्।

भव्येक्षणेन भवतः कृतिनो भवेम
स्वापं विमुञ्च धरणीश्वर! सुप्रभातम्॥ १३ ॥

मुक्तामयो मणिमयः कनकस्वरूपो
वैकुण्ठदिव्यनगरीनिलयो निजश्च।
स्वामीति पञ्चविधमेष शठारिसूरिः
त्वामुद्गृणाति भगवन्! तव सुप्रभातम्॥ १४ ॥

श्रीनाथयामुनयतीन्द्रमुखा महान्तः
अहोरात्रपुष्करिणिकाविहितावगाहाः।
धामान्तिकेऽञ्जलिभृतः प्रतिपालयन्ति
त्वां व्योमपत्तनपते! तव सुप्रभातम्॥ १५ ॥

वेदान्तदेशिकमणिर्गुणरत्नसिन्धुः
भक्त्योद्गृणन् अघटितं घटयन्तमत्र।
त्वां सेवितुं श्रितजनैः सह सन्निधत्ते
श्रीव्योमपुर्यधिपते! तव सुप्रभातम्॥ १६ ॥

वैखानसेन विधिनाऽर्चितपादपद्म
वैकुण्ठपुर्यधिपते! विनतार्तिहारिन्।
त्वद्वैश्वरूप्यविभवानुभवोत्सुकान् नः
धन्यान् विधेहि धरणिप्रिय! सुप्रभातम्॥ १७ ॥

श्रेयोनिदानमिदमेव समस्तजन्तोः
इत्याशयं करुणया स्वपदारविन्दम्।
निर्दिश्य दर्शयसि भूमिपते! करेण
त्वं दक्षिणेन भगवन्! तव सुप्रभातम्॥ १८ ॥

बध्वाऽञ्जलिं दुरितकृद्गतिरत्र केति
पार्श्वस्थया वसुधया कृपयाऽनुयुक्तः।
एषेति दक्षिणकरेण पदारविन्दम्
नैजं प्रदर्शयसि भूप्रिय! सुप्रभातम्॥ १९ ॥



www.prapatti.com

मामाश्रितस्य सुमतेरतिभीषणोऽपि
संसारसागर इयान् भवतीति नूनम्।
हस्तेन सूचयसि नाथ! कटिस्थितेन
वामेन भूमिकमितस्तव सुप्रभातम्॥ २० ॥

मद्दिव्यप्रयोगपरिखिन्नशठारिसूरि-
संश्लेषदं गगनपत्तनमेतदासीत्।
हातुं तदेतदुचितं न कदाचनेति
त्वं नित्यवासमिह वाञ्छसि सुप्रभातम्॥ २१ ॥

आकाशदिव्यनगरेश! शुभां त्वदीयां
मूर्तिं भजेय सततं दयतां भवान् मे।
पश्चात् भवं प्रतिभयं न हि कामयेति
आचष्ट ते कलिरिपुस्तव सुप्रभातम्॥ २२ ॥

अल्पास्थिरं वितरतः फलमीश्वरादीन्
नाहं स्मरामि दिवि तेऽनुभवादि लिप्से।
भूवल्लभेत्यकथयत् तव सन्निधाने
षट्सूक्तिकारकलिजित् तव सुप्रभातम्॥ २३ ॥

कुक्षौ स्थितिं तदनु जन्मजरामृतीश्च
त्वद्विस्मृतेर्मुहुरगां खपुराधिनाथ।
इत्यभ्यधान्निजदशां भवतः समीपे
भूम्याः पते! कलिरिपुस्तव सुप्रभातम्॥ २४ ॥

त्वं श्रीश्च दिव्यभुवने समयं विधाय
प्राप्तौ पृथग्वनमिदं जगतो विभूत्यै।
व्याजो मृकण्डुतनयस्य तपोऽवतारे
तस्याश्च ते च वसुधाधव! सुप्रभातम्॥ २५ ॥

निर्निद्रपद्मसुभगं नयनाम्बुजं ते
वैकुण्ठसीमनि निषेव्य वियत्पुरेऽस्मिन्।

नित्याः सुषुप्तिसुषमामनुभूय तृप्ताः
निद्रां विमुञ्च धरणीश्वर! सुप्रभातम्॥ २६॥

भाग्येन केनचन किङ्करताधिराज्यं
भक्ता जना भुवि भवत्कृपया प्रपन्नाः।
भोगैः समर्चयितुमीश! भवत्प्रतीक्षाः
भूमीश! जागृहि विभो! तव सुप्रभातम्॥ २७॥

रूपेषु पञ्चसु परं तव दिव्यमाद्यं
व्यूहस्तथा विभवसंज्ञमथान्तरं च।
अर्चेति तेषु चरमे कृतिनो रमन्ते
ये तान् विलोकय महीश्वर! सुप्रभातम्॥ २८॥

सूरीश्वरैर्बहुमते शठकोपमुख्यैः
अष्टोत्तरे सति शते भगवत्स्थलानाम्।
सौलभ्यमभ्यधिकमत्र पुरे वितन्वन्
वीक्षस्व नः क्षितिपते! तव सुप्रभातम्॥ २९॥

त्वत्सेवया तव गुणावलिकीर्तनेन
त्वद्भुक्तभोगरसतस्त्वदनन्यभक्त्या।
कालं समस्तमिह नः सफलं चिकीर्षुन्
प्रीत्याऽवलोकय महीश्वर! सुप्रभातम्॥ ३०॥

अप्राकृतं श्रुतिशतोक्तमकालकाल्यं
आनन्दसान्द्रमनघं परमं पदं तत्।
त्यक्त्वाऽऽगतस्त्वमवनेरवनाय देव!
सर्वंसहेश! भगवन्! तव सुप्रभातम्॥ ३१॥

शारीरकाधिकरणद्रमिडप्रबन्ध-
दुग्धाब्धिनिर्मथनजैर्गुणदिव्यरत्नैः।
वेदान्तदेशिकगुरुग्रथितां सुमालां
कण्ठे कुरु क्षितिपते! तव सुप्रभातम्॥ ३२॥

एलादिसंस्कृतसुगन्धिनदीजलाढ्यैः
हैमैर्घटैर्निजशिरोविधृतैर्लसन्तः।
त्वत्किङ्कारास्त्वदभिषेककृते समेताः
तानादिशावनिपते! तव सुप्रभातम्॥ ३३॥

कालोचिता गुणनिधे! विविधाः सपर्याः
भक्ता यथाऽधिकरणं प्रविधातुकामाः।
उत्थानमत्र भवतः प्रतिपालयन्ति
वैकुण्ठपुर्यधिपते! तव सुप्रभातम्॥ ३४॥

त्वत्तोऽधिका पुरुषकारतया धरित्री
तुल्या त्वया च फलताफलदातृताभ्याम्।
उक्ताकृतित्रयविशिष्टगृहिण्युपेत
वैकुण्ठपुर्यधिपते तव सुप्रभातम्॥ ३५॥

आकाशपत्तनपते! तव सुप्रभातम्
एतज्जनाः प्रतिदिनं भवतस्समीपे।
प्रातः पठन्तु सकलं शुभमाप्नुवन्तु
त्वत्पादपद्ममधुपानरता भवन्तु॥ ३६॥

॥ इति आकाशनगरीशसुप्रभातं समाप्तम्॥